Shri Raghunath Temple MSS. Library,
JAMMU

No. १६७-घ

Title निरालम्बोपनिषत्

Author

Extent २ Age

Subject उपनिषत्

विशालक्षोपनिषत्

५६७

३पत्रे

श्रीगणेशाय नमः ॥ अथ निरालंबोपनिषत्प्रारंभः ॥ ॐ सह नाववतु० शांतिः शांतिः शांतिः
ॐ० इम् ॥ नमः शिवाय गुरवे सच्चिदानंदमूर्तये ॥ निष्प्रपंचाय शांताय निरालंबाय तेजसे
१ ॥ निरालंबं समाश्रित्य सालंबं विजहाति यः ॥ स संन्यासी च योगी च कैवल्यं पदमश्नु
ते ॥ २ ॥ एषामज्ञानजीवानां समस्तारिष्ठशांतये ॥ यद्यद्बोद्धव्यमखिलं समाशंक्य ब्रवी
म्यतः ॥ ३ ॥ ॐ० किं ब्रह्म १ किं शबलं २ क ईश्वरः ३ को जीवः ४ का प्रकृतिः ५ कः परमात्मा ६ के
ब्रह्माद्याः ७ का जातिः ८ किं कर्म ९ किमकर्म १० किं तपः ११ किमासुरं १२ किं ज्ञानं १३ कि
मज्ञानं १४ ॥ कः संसारः १५ को बंधः १६ को मोक्षः १७ किं सुखं १८ किं दुःखं १९ कः स्वर्गः
२० को नरकः २१ किं परमं पदं २२ क उपास्यः २३ को विद्वान् २४ को मूढः २५ कः संन्यासी
२६ किं ग्राह्यं २७ किमग्राह्यं २७ किमग्राह्यं २८ कः समाधिः २९ ३ सोशंक्याह। ब्रह्मेति
च अखिलोपाधिविनिर्मुक्तं मनाद्यंतं शुद्धं शांतं निर्गुणं

निरवयवं नित्यानंदमखंडैकरसमद्वितीयं चैतन्यं ब्रह्म १ किं शबलं ब्रह्मेति॰ अव्यक्तमहद
हंकारपृथिव्याप्तेजोवाय्वाकाशात्मकत्वेन बृहद्रूपेणांडकोशेन कर्मज्ञानार्थं रूप लं बो
निरा तयाभासमानं सकलशक्त्युपबृंहितं शबलं ब्रह्म॰ २ क ईश्वर इति॰ एतल्लक्षणं ब्र
ह्मैव स्वप्रकृतिशक्त्यभिलेशमाश्रित्य लोकान्तस्थान्तर्यामित्वेन प्रविश्य ब्रह्मादीनां बुध्यादी
३ । द्रियनियंतृत्वादीश्वरः ३ को जीव इति॰ ब्रह्मविष्णुविश्वेशेंद्रादीनां द्वारा हेमित्यध्यासवशा
त्स्थूलो देह सोयमेकोपि देहोहं भेदवशादंशा बहवो जीवाः ॥४॥ का प्रकृतिरिति॥ ब्रह्मणः स ३
काशान्नानाविधजगद्विचित्रनिर्माणसामर्थ्यबुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः॥५॥ कः
परमात्मेति॥ देहादेः परत्वाद्ब्रह्मैव परमात्मा॥६॥ को ब्रह्माद्या इति॥ स ब्रह्म स शिवः सेंद्रः सोक्षरः
स विष्णुः स रुद्रः स मनुः स सूर्यः स चंद्रमाः स सुराः सोप्यसुराः स मनुष्याः स पिशा
चाः स जीवाः स स्त्रियः स पश्वादयाः स ब्राह्मणादयः स एव सर्वमिदं ब्रह्म नेह नाना

स्तिकिंचन॥७॥ का जातिरिति॥ चर्मरक्तवसामांसमज्जास्थीनीयुक्तानि च जातिरात्मनो जातिव्यव
हारोपिकल्पितः॥८॥ किं कर्मेति॥ इंद्रियैः क्रियमाणैर्नाहं करोनि कल्पितमीसध्यात्मनिष्ठत
यात्तत्कर्मैव कर्म॥९॥ किं कर्मेति॥ कर्तृत्वभोक्तृत्वाहंकारतया बंधःस्वरूपं जन्मातिकारणं नि
न त्य नैमित्तिकयागादिव्रत[illegible]सपदानेषु फलानुसंधानं यत्तत्कर्म॥१०॥ किं तप इति॥ ब्रह्मसत्यंज
गन्मिथ्येसपरोक्षज्ञानात्तूष्णीणं ब्रह्माद्यैश्वर्याशासंकल्पबीजसन्यासस्तपः॥११॥ किमासुरमि
ति॥ अत्युग्ररागद्वेषाहंकारोपेतं हिंसादंभाद्युक्तं तप॥ आसुरं॥१२॥ किं ज्ञानमिति॥ एकादशेंद्रि
यनिग्रहेण सद्गुरूपासनया श्रवणमनननिदिध्यासेन दृग्दृश्यप्रकारं सर्वं निरस्य सर्वांतरस्थं घ
टपदादिविकारपदार्थेषु चैतन्यं विना न किंचिदस्तीति साक्षात्कारानुभवो ज्ञानं॥१३॥ कि[illegible]
ज्ञानमिति॥ रज्जुसर्पज्ञानमिवाद्वितिये सर्वानुस्यूते सर्वमये ब्रह्मणि देवतिर्यङ्नरस्थावरस्त्रीपु

रूपवर्णाश्रमबंधमोक्षादिनानात्वकल्पितज्ञानमज्ञानं॥१४॥ कः संसार इति॥ अनाद्यविद्यावास
नयाजातोहं मृतोहंमित्यादिषड्भावविकारः संसारः॥१५॥ को बंध इति॥ पितृमातृसहोदराप
त्यगृहारामादिक्षेत्रादिसंसारावरणसंकल्पो बंधः कामादिसंकल्पः कर्तृत्वाद्यहंकारशंकाल
२ आभवगुणसंशयादिसंकल्पो देवमनुष्यादिरूपनानाकर्मयज्ञव्रततनप[illegible]नैदोनानाकल्पसं
2 कल्पयमाद्यष्टांगयोगाभ्याससंकल्पअणिमाद्यैश्वर्यादिसिद्धिसंकल्पः केवलमोक्षासं
कल्पः संकल्पमात्रं बंधः॥१६॥ को मोक्ष इति॥ नित्यानित्यवस्तुविचारादनित्यसंसारसम 2
स्तसंकल्पक्षयो मोक्षः॥१७॥ किं सुखमिति॥ सच्चिदानंदरूपतया ज्ञात्वाऽनंदावस्था मोक्ष
सुखं सुखं॥१८॥ किं दुःखमिति॥ अनात्मरूपविषयसंकल्प एव दुःखः॥१९॥ कः स्वर्ग इति॥
सत्संगः स्वर्गः॥२०॥ को नरक इति॥ असत्संसारविषईजनसंसर्ग एव नरकः॥२१॥ किं परमंपदमिति
प्राणेंद्रियांतःकरणादेः परतरं सच्चिदानंदमद्वितीयं सर्वसाक्षिणं सर्वगतं नित्यमुक्तं ब्र

ह्मस्वरूपंपरमंपदं॥२२॥कउपास्यइति॥सर्वशरीरस्थचैतन्यब्रह्मप्रापकोगुरुरुपास्यः॥२३॥
कोविद्वानिति॥सर्वांतरस्थंस्वसंविद्रूपंपरमात्मानंवेत्तिसविद्वान्॥२४॥कोमूढइति॥कर्तृत्व
भोक्तृत्वाद्यहंकारभावनामूढोमूढः॥२५॥कःसन्यासीति॥स्वस्वरूपावस्थायीसर्वकर्मफल
सागीसन्यासी॥२६॥किंग्राह्यमिति॥देशकालवस्तुपरिच्छेदरहितंवस्तुग्राह्यं॥२७॥किमग्रा
ह्यमिति॥स्वस्वरूपव्यतिरिक्तंमायामयंमनोबुद्धींद्रियगोचरंजगत्सत्यत्वचिंतनमग्राह्यं॥२८॥
कःसमाधिरिति॥सर्वमन्यत्परित्यज्यनिर्ममोनिरहंकारोभूत्वाब्रह्मैवशरणमधिगम्यत
त्त्वमस्यादिमहावाक्यार्थंनिश्चित्यनिर्विकल्पसमाधिनास्वतंत्रःसन्यश्चरतिसमुक्तः
सपूज्यःसपरमहंसःसोवधूतःसब्राह्मणःससत्यसंधःससर्ववितसर्वएवब्राह्मणइति
॥२९॥कोवाब्राह्मणइति॥ब्रह्मवित्सर्वएवब्राह्मणइति॥निरालंबोपनिषदंयोधीतेस

ब्रह्मभूत्वानपुनरावर्ततेनपुनरावर्ततइति॥इत्युपनिषत्॥यच्चैतन्यमनुस्यूतंजाग्र
त्स्वप्नसुषुप्तिषु॥तदेवाहंपरंतत्वमितोनास्त्यधिकंपरं॥सहनाववतु॰ॐशांतिःशां
तिःशांतिः॥निरालंबोपनिषत्॥

३ ॥ समाप्तः ॥ ५॥४ ३

3